This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३०

॥अष्टपदिप्रारंभः॥

Accession No:- ~~130~~ M1277.

Title:- अष्टपदी (गीतगोविंद

Subject:- poetry

Date:- A.D. 1799

Author:- राजाराम भट देव

पत्रे :- 27

K K S U LIBRARY
RAMTEK
441 106
M.1277
Dist Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ ॥श्रीगणेशायनमः॥श्रीगोविंदायनमः॥प्रलयपयोधिजलेधृ पद्दि
तवानसिवेदं॥विहितवहित्रचरित्रमखेदं॥१॥केशवधृतमी
नशरीरे॥जयजगदीशहरे॥ध्रुवपदं॥क्षितिरतिविपुलतरे
तवतिष्ठतिपृष्ठे॥धरणिधरेणकिणचक्रगरिष्ठे॥२॥केशव
धृतकछपरूपजयजगदीशहरे॥वसतिदशनशिखरेधरणि
तवलग्ना॥शशिनिकलंककलेवनिमग्ना॥३॥के०सूकररूप
ज०॥तवकरकमलवरेनखमद्भुतश्रृंगं॥दलितहिरण्यकशि
पुतनुभृंगं॥४॥के०नरहरिरूपं॥जय०छलयसिविक्रमणे ॥ १

बलिमद्भुतवामन॥पदनखनिरजनितजनपावन॥५॥केशा०
वामनरूप॥जय०क्षत्रियरुधिरमयेजगदपगतपापं॥स्नपय
सिपयसिशमितभवतापं॥६॥केश०भृगुपतिरूपं॥जय०वि
तरसिदिक्षुरणेदिक्पतिकमनियं॥दशमुखमौलिबलिरमणी
यं॥७॥के०रघुपतिरूपं॥जय०वहसिवपुषिविशदेवसनंजल
दाभं॥हलहतिभीतिमिलितयमुनाभं॥८॥के०हलधररूपं॥
जय०निंदसियज्ञविधेरहह श्रुतिजातं॥सदयहृदयदर्शितप
शुघातं॥९॥केशवधृतबुद्धशरीर॥जयजयजगदीशहरे॥

(२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ म्लेंछनीवहनीधनेकलयसिकरवालं॥धूमकेतुमिवकिमपि ॥पदि॥
करालं॥१०॥केशवधृतकल्किशरीर॥जयजगदीशहरे॥श्री
जयदेवकवेरिदमुदितमुदारं॥श्रणुसुखदंशुभदंभवसारं॥
॥११॥केशवधृतदशविधरूप॥जयजगदीशहरे॥वेदानु
द्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेबलिं
छलयतेक्षत्रक्षयंकुर्वते॥पौलस्त्यंजयतेहलंकलयतेका
रुण्यमातन्वतेम्लेंछान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यं
नमः॥श्रितकमलाकुचमंडलधृतकुंडल॥कलितललितव ॥२॥

७ नमधुमुरनरकविनाशनगरुडासनए॥सुरकुलकेलिनिदाने॥भा
नमाल॥१॥जयजयदेवहरे॥दिनमणिमंडलमंडनभवखंड
न॥मुनिजनमानसहंस॥२॥जय॰कालियविषधरगंजनज
नरंजन॥यदुकुलनलिनदिनेशं॥३॥जय॰अमलकमलद
ललोचनभवमोचन॥त्रिभुवनभुवननिधान॥जय॰मधु
मुरनरकविनाशनगरुडासन॥सुरकुलकेलिनिदान॥४॥
जय॰अभिनवजलधरसुंदरधृतमंदर॥श्रीमुखचंद्रचकोर॥ च
जय॰जनकसुताकृतभूषणजितदूषण॥समरशमीतदशा
कंठ॥७॥जयजयदेवहरे॥तवचरणेप्रणतावयमीतिभा

३

॥३॥ वय॥कुरुकुशलंप्रणतेषु॥८॥जयजयदेवहरे॥श्रीजयदे
वकवेरिदंकुरुतेमुदं॥मंगलमुज्वलगीतं॥जयजयदेव
टी हरे॥पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरोम
धुसूदनस्य॥व्यक्तानुरागमिवखेलदनंगखेदस्वेदांबु
पूरमनुपूरयतुप्रियंवः॥१॥वंदेवृंदावनासीनमिं
दिरानंदमंदिरं॥उपेंद्रंसांद्रकारुण्यपरानंदपरंविभुं॥१॥
श्रीगोविंदायगुरवेनमः॥अष्टपदि॥२॥श्रीगोविंदायपन
मः॥ललितलवंगलतापरिशीलनकोमलमलयसमीरे॥ ॥३॥

मधुरकरनीकरकरंबितकोकिलकूजितकुंजकुटीरे॥१॥विह
रतिहरिरिहसरसवसंते॥नृत्यतियुवतिजनेनसमंसखी
विरहिजनस्यदुरंते॥१॥ध्रुपदं॥उन्मदमदनमनोरथपथिक
वधूजनजनितविलापे॥अलिकुलसंकुलकुसुमसमूहनिरा
कुलबकुलकलापे॥२॥विरहतिह०॥मृगमदसौरभरभसव
शंवदनवदलमालतमाले॥युवजनहृदयविदारणमनसि
जनखरुचिकिंशुकजाले॥३॥वीर०॥मदनमहीपतिकनक
दंडरुचिकेसरकुसुमविकासे॥मिलितशिलीमुखपाट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥ लीपटल तस्मरत्‍रणविस्ठासे॥४॥वीरह॥विगलितलज्जि
तजगदवलोकनतरूणकरूणकृतहासे॥वीरहिनि कृंतन
कुंतमुखाकृतिकेतकिदंतुरितासे॥५॥वी॰॥माधवी कापरि
मलललितेनवमालिकयातिसुगंधो॥मुनिमनसामपिमोह
नकारिणितरूणाकारणबंधो॥६॥वी॰॥स्फुरदतिमुक्तलता
परिरंभनमुकुलीतपुलकीतचूते॥वृंदावनविपिनेपरिस
रपरिगतयमुनाजलपूते॥७॥वी॰॥श्रीजयदेवभणित
मिदमुदयतिहरिचरणस्मृतिसारं॥सरसवसंतसमयव ॥४॥

नवर्णनमनुगतमदनविकारं॥८॥विहरतीहरीरिहसरसव
संते॥नृत्यतियुवतिजनेनसमंसखीविरहीजनस्यदुरंते॥
अष्टपदि॥३॥श्रीगोविंदायनमः॥चंदनचर्चितनीलकलेव
रपीतवसनवनमाली॥केलिचलन्मणिकुंडलमंडितगंडयु
गस्मीतशाली॥१॥हरिरिहमुग्धवधूनिकरे॥विलासिनिवि
लसतिकेलिपरे॥ध्रुव॰॥पीनपयोधरभारभरेणहरिंपरि
रभ्यसरागं॥गोपवधूरनुगायतिकाचिदुदंचितपंचमरा
गं॥२॥हरिरि॰॥कापिविलासविलोलविलोचनखेलनज

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ नितमनोजं ॥ध्यायती मुग्धवधूरधिकं मधुसूदनवदनसरोजं
॥३॥ हरिरि० ॥ कापिकपोलतले मिलिता लपितुं किमपिश्रुतिमू
ले ॥ चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ॥ ४ ॥ हरि०
केलिकला कुतुकेन च काचिदमुं यमुनाजलकूले ॥ मंजुळ
वंजुळकुंजगतं बीचकर्ष करेण दुकूले ॥ ५ ॥ हरि० ॥ करतलता
लतरलवलयावलीकलितकलस्वेनवंशे ॥ रासरसे सहनृत्य
पराहरिणा युवतिः प्रशशंसे ॥ ६ ॥ हरी० ॥ श्लिष्यति कामपि चुंब
ति कामपि कामपि रमयति रामां ॥ पश्यति सस्मितचारुपरामप ॥५॥

रामनुगच्छति वामां ॥ ७ ॥ हरि० ॥ श्रीजयदेवकवेरिदमद्भुतकेशव
केलिरहस्यं ॥ वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यं ॥ ८ ॥
हरिहरिह मुग्धवधुनिकरे ॥ विलासिनि विलसति केलिपरे ॥ ध्रु ॥
श्रीरामजयरामजयजयराम ॥ श्रीगोविंदअष्टपदि ॥ ४ ॥ श्रीगोविं
दायनमः ॥ संचरदधरसुधामधुरध्वनिमुखरीतमोहनवंशं ॥
चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं ॥ १ ॥ रासे हरि
मीह विहीतविलासं ॥ स्मरती मनो मम कृतपरिहासं ॥ ध्रुवपदं ॥
चंद्रकचारुमयुरशिखंडकमंडलवलयीतकेशं ॥ प्रचुरपुरंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

6

॥६॥ रधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥रासे०॥गोपकदंब
नितंबवतीमुखचुंबनलंबितलोभं॥बंधुजीवमधुराधरप
ल्लवमुल्लसितस्मितशोभं॥३॥रासे०॥विपुलपुलकभुजप
त ल्लववलयितवल्लवयुवतिसहस्रं॥करचरणोरसिमणिगणभू
षणकिरणविभिन्नतमिस्रं॥४॥रासे०॥जलदपटलचलदिंदु
विनिंदकचंदनतिलकललाटं॥पीनपयोधरपरिसरमर्दननि २
र्दयहृदयकपाटं॥५॥रासे०॥मणिमयमकरमनोहरकुंडलमं
डितगंडमुदारं॥पीतवसनमनुगतमुनिमनुजसुरासुरवर ॥६॥

परिवारं॥६॥रासे०॥विषदकदंबतलेमिलितंकलिकलुषभयंश
मयंतं॥मामपिकिमपितरंगदनंगदृशामनसारमयंतं॥७॥रासे०
श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं॥हरिचरणस्मर
णंप्र[illegible]तिपुण्यवतामनुरूपं॥८॥रासेहरिमिहविहितविलासं॥
स्मरतिमनोममकृतपरिहासं॥अष्टपदि॥५॥श्रीगोविंदायनमः॥
निभृतनिकुंजगृहंगतयानिशिरहसिनिलीयवसंतं॥चकितवि
लोकितसकलदिशारतिरभसरसेनहसंतं॥१॥सखिहेकेसिम
थनमुदारं॥रमयमयासहमदनमनोरथभावितयासविकारं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवपदं॥प्रथमसमागमलज्जितयापटुचाटुशतैरनुकूलं॥मृदु
मधुरस्मितभाषितयाशिथिलीकृतजघनदुकूलं॥२॥सखि०
किशलयशयननिवेशितयाचिरमुरसिममैवशयानं॥कृतप ३ ६
रिरंभणचुंबनयापरिरभ्यकृताधरपानं॥३॥सखी०॥अलस
निमीलितलोचनयापुलकावलिललितकपोलं॥श्रमजलसि
क्तकलेवरया[illegible]वरमदनमदादतिलोलं॥४॥सखी॥कोकि
लकलरवकूजितयाजितमनसिजतंत्रविचारं॥श्लथकुसु
माकुलकुंतलयानखलिखितघनस्तनभारं॥५॥सखी॥च ॥७॥

रणरणितमणीनूपुरयापरिपूरितसुरतवितानं॥मुखरविशृं
खलमेखलयासकचग्रहचुंबनदानं॥६॥सखी॥रतीसुखस
मयरसालसयादरमुकुलितनयनसरोजं॥निःसहनिपतितत
नुलतयामधुसूदनमुदितमनोजं॥७॥सखी०॥श्रीजयदेवभ
णीतमिदमतिशयमधुरिपुनिधुवनसिलं॥सुखमुत्कंठितगो
पवधूकथितंवितनोतिसलिलं॥८॥सखीहेकेसिमथनमुदा
रं॥रमयमयासहमदनमनोरथभावितयासविकारं॥अष्टप
दि॥९॥श्रीगोविंदायनमः॥मामीयंचलिताविलोक्यवृतंवधु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अष्ट०॥ पता । चि । खिन्नमसूयया हृदयं तवाकलयामि । ॥प॥
ता । न्निवेद्मि कुतो पगेता सिन्ने तेनुनयामि ।४।
॥ ८ ॥ नीचये न॥सापराधतर्यन्नैनिवारि तातिभयेन॥१॥हरिहरि मया १
१ सा हतादरतयागता कुपितेव॥ ध्रुपदं॥ किंकरिष्यति किं वदिष्य
तिसाचिरं विरहेन॥ किंजनेन धनेन ममकिं गृहेणसुखे
न॥२॥हरि०॥चिंतयामितदाननं कुटिलभ्रु रोषभरेण॥
१प शोणप मिवोपरिभ्रमताकुलं भ्रमरेण॥३॥हरि०॥तामहं रे ५
हृदीसंगतामनीशंभृशं रमयामि॥ किंवनेनुसरामि तामिह किं
वृथाविलपामि॥४॥हरि०॥तन्विखिन्नमसूयया हृदयं तवा
कलयामि॥तंन वेद्मि कुतोगतासि नतेन तेनुनेयामि॥५॥हरि०॥ ८ ॥

न १

दृश्यसे पुरतोगतागतमेव मे विदधासि॥ किं पुरेव ससंभ्रमं परि
रंभणं न ददासि॥६॥हरि०॥क्षम्यतामपरं कदापि तवेदृशं न क
रोमि॥देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि॥७॥हरि०॥वर्णि
तं जयदेवकेन हरेरिदं प्रणवेन॥ किंदुबिल्वसमुद्रसंभवरोहि
णीरमणेन॥८॥हरिहरिहतादरतयागतासाकुपितेव॥७॥हरे
रांहरेरामरामरामहरेहरे॥हरेकृष्ण हरेकृष्ण कृष्णकृष्ण हरेह
रे॥ॐनमोभगवतेवासुदेवाय॥अष्टपदि॥७॥श्रीगोविंदाय
नमः॥निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं॥व्याल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ९ ॥ निलयमि लनेन गरलमिव कलयति मलयसमीरं॥१॥साविरहेत
वदीना॥माधव मनसि जवि सिख भयादीव भावनयात्वईलीना॥
ध्रुपद॥अविरलनीपतित मदनशरादीव भवदवनायविशालं॥
स्वहृदयमर्मणि कर्मकरोति सजलनलिनीदलजालं॥२॥सावी॰॥
कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं॥व्रत
मीवतवपरिरंभसुखायकरोतिकुसुमशयनीयं॥३॥सा॰॥वहति
२ग चवलितविलोचनजलधरमाननकमलमुदारं॥वीधुमीवविक
टविधुंतुददंतदलनगलीतामृतधारं॥४॥विलिखतिरहसिकु ॥ ९ ॥

रंगमदेन भवन्तमसमशरभूतं॥प्रणमतिमकरमधोविनिधायक
२ चूतं रेचशरं नववं॥५॥सा॰॥ध्यानलयेनपुरःपरिकल्प्य भवंतमतीवदुरा
३रोदति पं॥विलपतिहसतिविषीदतिचुंचतिमुंचतितापं॥६॥सा॰॥प्रति
पदमिदमपिनिगदतिमाधवतवचरणेपतिताहं॥त्वईविमु
खेमयिसपदिसुधानिधिरपितनुतेतनुदाहं॥७॥सा॰॥श्रीजय
देवभणितमीदमधिकंयदिमनसानटनीयं॥हरिविरहाकुलबल्ल
वयुवतिसखीवचनंपठनीयं॥८॥साविरहेतवदीना॥माधवमन
सिजवीशिखभयादिवभावनयात्वईलिना॥अष्टपदि॥८॥श्रीगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ विंदायनमः॥स्तनविनिहितमपिहारमुदारं॥सामनुतेकृशतनुरिव
भारं॥राधिकाविरहेतवकेशव॥ध्रुपद॥सरसमसृणमपिमलय
जपंकं॥पश्यतिविषमिववपुषिसशंकं॥१॥राधिका०॥श्वसितप
वनमनुपमपरि हं॥मदनदहनमिववहतिसदाहं॥२॥राधि०॥
दिशिदिशिकिरतिसजलकणजालं॥नयननलिनमिवविगलि
तनालं॥३॥राधि०॥त्यजतिनपाणितलेनकपोलं॥बालशशिन
मिवसायमलोलं॥४॥राधि०॥नयनविषयमपिकिशलयत
ल्पं॥कलयतिविहितहुताशनकल्पं॥५॥राधि०॥हरिरितिहरि ॥१०॥

रितिजपतिसकामं॥विरहविहितमरणेवनिकामं॥६॥राधिका०॥
श्रीजयदेवभणितमिति गीतं॥सुखयतुकेशवपदमुपनीतं॥७॥
राधिकाविरहेतवकेशव॥हरेराम॥हरेकृष्ण॥अष्टपदि॥९॥८॥
श्रीगोविंदायनमः॥वहतिमलयसमीरेमदनमुपनिधाय॥स्फुटति
कुसुमनिकरेविरहि हृदयदलनाय॥१॥तववीरहेवनमालिसखे
सीदतिराधे॥ध्रुपद॥दहतिशिशिरमयूखेमरणमनुकरोति॥
पतितमदनविशिखेविलपतिविकलतरोति॥२॥तव०॥ध्वनति
मधुपसमूहेश्रवणमपिदधाति॥मनसीचलि तवीरहे निशिनि

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥ शिरुजमुपयाति॥३॥नय०॥वसतिविपिनवितानेस्यजतिललित
धाम॥लुंठतिधरणिशयनेबहुविलपतितवनाम॥४॥तव०॥भ
णतिकविजयदेवेविरहिविलसितेन॥मनसिरभसविभवेहरि
रुदयतुसुकृतेन॥५॥तव०॥अष्टपदि॥१०॥श्रीवासुदेवायनमः॥
रतिसुखसारेगतमभिसारेमदनमनोहरवेषं॥नकुरुनितंबि
निगमनविलंबनमनुसरतंहृदयेशं॥१॥धीरसमीरेयमुनाती
रेवसतिवनेवनमालि॥गोपिपीनपयोधरमर्दनचंचलकरयु
गशालि॥ध्रुवपद॥नामसमेतंकृतसंकेतंवादयतेमृदुवेणुं॥धी ॥११॥

हुमनुतेननुतेतनुसंगतपवनचलितमपिरेणुं॥२॥धी०॥पतति
पतत्रेविचलितपत्रेशंकितभवदुपयानं॥रचयतिशयंसच क
कितनयनंपश्यतितवपंथानं॥३॥धी०॥मुखरमधीरंत्यजमं
जीरंरिपुमिवकेलिसुलोलं॥चलसखिकुंजंसतिमिरपुंजंशी
लयनीलनिचोलं॥४॥धीर०॥उरसिमुरारेरुपहितहारेघन
इवतरलबलाके॥तडिदीवपीतेरतिविपरीतेराजसिसुकृतवि
पाके॥५॥धीर०॥विगलितवसनंपरिहृतरसनंघटयजघन
मपिधानं॥किसलयशयनेपंकजनयनेनिधिमिवहर्षनिधा

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्ट०।।
।।१२।।

।।पदि।।

नं ।।६।। धीर०।। हरिरभीमानिरजनिरिदानिमियमपियातिविरा
मं ।। कुरुममवचनंसत्वररचनंपुरयमधुरिपुकामं ।।७।। धीर०।।
श्रीजयदेवेकृतहरिसेवेभणतिपरमरमणीयं ।। प्रमुदितहृद
येहरिमतिसदयंनमतसुकृतकमनीयं ।।८।। धीर०।। अष्टपदि ।।११।।
श्रीगोविंदायनमः ।। पश्यतिदिशिदिशिरहसिभवंतं ।। त्वदधरमधु
रमधुनिपिबंतं ।।१।। नाथहरे ।। सीदतिराधावासगृहे ।। ध्रुप०।। २२५
त्वदभीशरणरभसेन लंति ।। पततिपदानिकियंतिचलंति ।।
।।२।। नाथ०।। विहितविशदबीसकीशलयवलया ।। जीवतिप ।।१२।।

रमीहतवरतीकलया ।।३।। ना०।। मुहुरवलोकितमंडनलीला ।। मधु
रिपुरहमीतिभावनशीला ।।४।। नाथहरे ।। त्वरितमुपैतिनकथ
मभिसारं ।। हरिरितिवदतिसखिमनुवारं ।।५।। नाथ०।। श्लीष्य
तिचुंबतिजलधरकल्पं ।। हरिरुपगतइतितिमिरमनल्पं ।।६।।
।।नाथ०।। भयतिविलंबिनिबिगलितलज्जा ।। बिलपतिरोदति
वासकसज्जा ।।७।। नाथ०।। श्रीजयदेवकवेरीदमुदीतं ।। रसिक
जनंतनुतामतिमुदीतं ।।८।। नाथ०।। सीदतिराधावासगृहे ।। तत्किं
कामपिकामिनिमभिसृतः किंवाकलाकेलीभिर्बद्धोबंधुभिर

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३॥ धकारिणि वनाभ्यर्णे किमु भ्राम्यति॥कोलः क्लांत मना मनाग
पि चतत्प्रस्थातुमेवाक्षमः संकेतीकृतमंजु वंजुललताकुंजे
पिय न्नागतः॥११॥अष्टपदि॥१२॥लिखिते॥श्रीगोविंदायन
मः॥कथितसमयेपिहरिरहहनययौवनं॥ममविफलमिद
ममलरूपमपियौवनं॥१॥यामि हे कमिह शरणं॥सखीवच
नवंचिता॥ध्रुपदं॥यदनुगमनाय निशि गहनमपि शीलितं॥
तेन मम हृदयमिदमसमशरकीलितं॥२॥या०॥मम मरणमेव
वरमति वितथकेतना॥किमिति विषहामि विरहानलमचे ॥१३॥

तना॥३॥या०॥मामहह विधुरयति मधुमधुरयामिनी॥का
पीहरिमनुभवति कृतसुकृतकामिनी॥४॥अहह कलयामि व
लयादिमणिभूषणं॥हरिविरहदहनवहनेन बहुदूषणं॥५॥या०
कुसुमसुकुमारतनुमतनुशरलीलया॥स्रगपि हृदि हंति माम
ति विषमशीलया॥६॥या०॥अहमिह निवसामि नविगणितवन
वेतसा॥स्मरति मधुसूदनो मामपि न चेतसा॥७॥या०॥हरिचर
णशरणजयदेवकविभारती॥वसतु हृदि युवतिरिव कोमल
कलावती॥यामि हे कमिह शरणं॥सखीजनवचनवंचिता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

14

॥ॐनमोभगवतेवासुदेवाय॥श्रीराम॥अष्टपदि॥१३॥श्रीगोविंदा
यनमः॥स्मरसमरोचितिविरचितवेशा॥गलितकुसुमभरविलु
लितकेशा॥१॥कापिचपलामधुरिपुणा॥विलसतियुवतिरधी
कगुणा॥ध्रुपद॥हरिपरिरंभणवलितविकारा॥कुचकलशो
परितरलितहारा॥२॥का०॥विचलदलकललिताननचंद्रा॥तद
धरपानरभसकृततंद्रा॥३॥का०॥चंचलकुंडलललितकपोला॥
मुखरीतरसनजघनगतिलोला॥४॥का०॥दयितविलोकितल
ज्जितहसिता॥बहुविधकुजितरतिरससीता॥५॥का०॥विपुल ॥१४॥

पुलकपृथुवेपथुभंगा॥श्वसितनिमिलितविकसदनंगा॥६॥कापि०॥
श्रमजलकणभरसुभगशरीरा॥परिपतितोरसिरतीरणधीरा॥७॥
॥का०॥श्रीजयदेवभणितहरिरमीतं॥कलिकलुषंजनयतुपरि
शमितं॥८॥कापिचपलामधुरिपुणा॥विलसतियुवतिरधीक
गुणा॥ध्रु॥विरहपांडुमुरारिमुखांबुजद्युतिरयंतीरयन्नपिवेदनां॥
विधुरतिवतनोतिमनोभुवःसुहृदयेहृदयेमदनव्यथा॥१॥अ
ष्टपदि॥१४॥श्रीगोविंदायनमः॥समुदितमदनेरमणीवदनेचुंब
नवलिताधरे॥मृगमदतिलकंलिखतिसपुलकंमृगमिवरजनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।१५।। करे।।१।।रमते यमुनापुलिनवने।।वि जई मुरारिरघुना।।ध्रुपद।।
घनचयरुचिरे रचयति चिकुरे तरलीततरुणानने।।कुरुबककु
सुमं चपलासुषुमे रतिपतिमृगकानने।।२।।रमते०।।घटयति
सुघने कुचयुगगगने मृगमदरुचिरूषिते।।मणिसरममलं तारकप
टलं नखपदशशिभूषिते।।३।।रमते०।।जितबिसशकले मृदुभुज
युगले करतलनलिनीदले।।मरकतवलयं मधुकरनिचयं वितर
ति हिमशीतले।।४।।रमते०।।रतीगृहजघने विपुलापघने मनसी
जकनकासने।।मणिमयरसनं तोरणहसनं विकिरति कृतवसने।। ।।१५।।

।।५।।रमते०।।चरणकिसलये कमलानिलये नखमणिगणपूजिते।।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते।।६।।रमते०।।र
मयति सुभृशं कामपि सुदृशं खलहलधरसोदरे।।किमफलमवसं
चिरमिह विरसं वद सखी विटपोदरे।।७।।रमते०।।इह रसभ णने
कृतहरीगुणने कविनृपजयदेवके।।कलियुगचरितं नवसतु दुरि
९ब तं मधुरिपुपदसेवके।।८।।रमते यमुनापुलिनवने।।विजई मुरा
रिरघुनाथ।।नायातः सखी निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छंदं बहुवल्लभः स रमते किं तत्र ते दूषणं।।पश्याद्य प्रियसंगमा

८ मधुरिपुपदसेवके। कलियुग च रितं नवसतु दुरितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥ यदयितस्याक्लष्यमाणंगुणैरुत्कंठार्त्तिभराद्दियस्फुटदिदंचेतस्वयं
यास्यति॥१॥अष्टपदि॥१५॥श्रीगोविंदायनमः॥अनिलतरलकु
वलयनयनेन॥तपतिनसाकिशलयशायनेन॥१॥सखीया
रमितावनमालिना॥विकसितसरसिजललितमुखेन॥स्फुटति
नसामनसिजविशिखेन॥२॥स०॥अमृतमधुरमृदुलरवच
नेन॥ज्वलतिनसामलयजपवनेन॥३॥स०॥स्थलजलरुहरुचि
करचरणेन॥लुठतिनसाहिमकरकिरणेन॥४॥सखी॥सज
लजलदसमुदयरुचिरेण॥दलतिनसाहृदिविरहभरेण॥५॥ ॥१६॥

॥सखी॥कनककनीकषरुचिसुचिवसनेन॥श्वसितिनसापरिजन
हसनेन॥६॥सखी॥सकलभुवनजनवरतरुणेन॥वहतिनसा
रुजमतिकरुणेन॥७॥सखी॥श्रीजयदेवभणितमिलनेन॥प्रवि
शतुहरिरपिहृदयमनेन॥८॥सखीयारमितावनमालिना॥शत
मखपूजितपादंशतपथमनसोप्यगोचराकारं॥विकसितजल
रुहनेत्रंसीताछायांकमाश्रयेरामं॥१॥अष्टपदि॥१६॥श्रीगोविं
दायनमः॥रजनिजनितगुरुजागररागकषायितमलसनिमेशं॥
वहतिनयनमनुरागमिवस्फुटमुदितरसाभिनिवेशं॥१॥

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अष्ट०॥ ॥पदि॥

॥१७॥ हरिहरियाहिमाधवयाहिकेशवमावदकैतववादं॥ ॥तामनुसर
सरसिरुहलोचनयातवहरतिविषादं॥ध्रुपद॥कज्जलमलि
नविलोचनचुंबनविरचितनीलिमरूपं॥दशनवसनमरूपं
तवकृष्णतनोतितनोरनुरूपं॥२॥हरि०याहि०॥वपुरनुहरति
तवस्मरसंगरखरनखरक्षतरेखं॥मरकतशकलकलि
कलधौतलिपेरिवरतिजयलेखं॥३॥हरि०याहि०॥चरणकम
लगलदलसीलमिदंतवहृदयमुदारं॥दर्शै तीवबहिर्मदन य
द्रुमनवकिसलयपरिवारं॥४॥हरि०याहि०॥दशनपदंभव ॥१७॥

२ श्लोक

ं चंदनरुचिरकुचहृदयसंगमसंगततेमलविंबं॥ह ह१
ति२ दयमिदंतवतुलयमाधवनवघनगतशशिबिंबं॥६
दधरगतंममजनयतिचेतसिखेदं॥कथयतिकथमधुनापिम
यासहनयवपुरेतदभेदं॥५॥हरि०याहि०॥वपुरिवमलिनतरं बलि२
तवकृष्णमनोपिभविष्यतिनूनं॥कथमथवंचयसेजनमनु
४म गतंसमशरज्वरदूनं॥६॥हरि०याहि०॥भ्रमतिभवानबलाक
वलायवनेषुकिमत्रविचित्रं॥प्रथयतिपूतनिकैववधूवध
निर्दयबालचरित्रं॥७॥हरि०याहि०॥श्रीजयदेवभणितरतिवं
चितखंडितयुवतिविलापं॥शृणुतसुधामधुरंविबुधा[illegible]
लयतोपिदुरापं॥८॥हरिहरियाहिमाधवयाहिकेशवमाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ दकैतवपादं॥तामनुसरससिरुहलोचनपातयहरति शीषादं॥ध्रु
नयेदंपरपंत्याः प्रसरदनुरागंबहिरिव प्रियापादालक्तं क्षुरितम
रुणच्छायहृदयं॥ममाद्यप्रख्यातप्रणबभरभंगेनकितवत्वदालो
कः शोकादपिकिमपिलज्जांजनयति॥१॥अंतर्मोहनमौलिघूर्ण
नचलन्मंदारविस्रंसनस्तंभ्याकर्षणदृष्टिहर्षणमहामंत्रः कुरं
गीदृशां॥दृप्यद्दानवदूयमानदिविषदुर्वारदुःखापदांभ्रंशः कंसारि
पोर्व्यपोहयतुनोश्रेयांसिवंसिस्वः॥अष्टपदि॥१७॥श्रीगोविंदाय
नमः॥हरिरभिसरतिवहतिमधुपवने॥किमपरमधिकसुखंस ॥१८॥

खिभुवने॥१॥माधवेमाकुरुमानिनीमानमये॥ध्रुपद॥तालफला
दपिगुरुमतिसरसं॥किंविफलीकुरुषेकुचकलशं॥२॥मा०॥कति
नकथितमिदमनुपदमचिरं मापरिहरहरिमतिशयरुचिरं॥३॥मा०॥
किमितिविषीदसिरोदिषिविकला॥विहसतियुवतिसभातवसक
पलि लां॥४॥माध०॥सजलनलिनिदलसीतलशयने॥हरिमवलोकय
सफलयनयने॥५॥माध०॥जनयसिमनसिकिमितिगुरुखेदं॥श्र
णुमेवचनमनीहितभेदं॥माध०॥६॥हरिरुपयातुवदतुबहुमधुरं
किमितिकरोषिहृदयमतिविधुरं॥७॥माधवेमाकुरुमा०॥श्रीज

(19)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदेवभणितमतिललितं॥सुखयतु रसिकजनं हरिचरितं॥माध
वे माकुरु मानिनी मानमये॥छ॥वासुदेवं सुतं देवं कंसचाणूरमर्द
नं॥देवकीपरमानंदं कृष्णं वंदे जगद्गुरुं॥१॥अष्टपदि॥१८॥श्रीगो
विंदाय नमः॥वदसि यदि किंचिदपि दंतरुचिरकौमुदि हरति दरतिमि
रमतिघोरं॥स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचन
चकोरं॥१॥प्रिये चारुशीले मुंच मई मानमनिदानं॥सपदि मदना
नलो दहति मम मानसं देहि मुखकमलमधुपानं॥ध्रुपद॥सत्यमे
वासि यदि सुदति मई कोपिनि देहि खरनखरशरघातं॥घटय ॥१९॥

भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं॥२॥प्रिये चा०॥
त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधि
रत्नं॥भवतु भवतीह मयि सततमनुरोधिनि तत्र मम हृदयमति
यत्नं॥३॥प्रिये०॥नीलनलिनाभमपि तें लोचनं धारयति कोकनदरू न्वितव
पं॥कुसुमशरतवन भावेन यदि रंजयसि कृष्णमिदमेतदनुरूपं॥४॥
प्रिये०॥स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं॥
रसतु रसनापि तव घनजघनमंडले घोषयतु मन्मथनिदेशं॥५॥
प्रिये०॥स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥ गं॥घर्णमसृणवाणिकरवाणि-चरणद्वयंसरसलसदलक्तकरंगं॥५॥
प्रिये०॥स्मरगरलखंडनंममशिरसिमंडनं देहिपदपल्लवमुदारं॥
ज्वलतिमईदारुणोमदनकदनानलोहरतुतदुपाहितविकारं॥७॥
प्रिये०॥इति-चटुल-चाटुपटु-चारुमुरवैरिणोराधिकामधिवचनजा
तं॥जयतिपद्मावतिरमणजयदेवकविभारतिभणितमतिशातं
॥८॥प्रिये-चारुशीलेमुंचमइमानमनिदानं॥सपदिमदनानलो
दहतिममभानसंदेहिमुखकमलमधुपानं॥७॥हरेराम॥हरेकृ०॥
॥१॥अष्टपदि॥१९॥श्रीगोविंदायनमः॥विरचित-चाटुवचनरचनं ॥२०॥

चरणेरचितप्रणिपातं॥संप्रतिमंजुलवंजुलसीमनिकेलिशयन
मनुयातं॥१॥मुग्धेमधुमथनमनुगतमनुसरराधिके॥ध्रुपदं॥
घनजघनस्तनभारभरेदरमंथरचरणविहारं॥मुखरितमणि
मंजिरमुपैहिविधेहिमरालनिकारं॥२॥मुग्धेम०॥शृणुरमणीय
तरंतरुणीजनमोहनेमधुरिपुरावं॥कुसुमशरासनशासनबंदि
निपिकनिकरेभजभावं॥३॥मुग्धेम०॥अनिलतरलकिसलय
निकरेणकरेणलतानिकुरंबं॥प्रेरणमिवकरभोरुकरोतिगतिंप्र
तिमुंचविलंबं॥४॥मुग्धे०॥स्फुरितमनंगतरंगवशादिवसूचित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥ हरिपरिरंभं॥ पृथमनोहरहारविमलजलधारमीमं कुचकुंभं॥
॥५॥मुग्धे०॥अधिगतमखिलसखीभिरिदं तव वपुरतिरती
रणसज्जं॥ चंडीरसितरसनौवलीडिंडीममभीसरसरसजं
लज्जं॥६॥मुग्धे०॥स्मरशरसुभगनखेंनकरेणसखिमवलंब्य
सलीलं॥चलवलयक्वणितैरवबोधय हरिमपि निजगतीसीलं
॥७॥मुग्धे०॥श्रीजयदेवभणितमधरीकृतहारमुदासितरामं॥
हरिविनिहितमनसामधितिष्ठतु कंटतटीमविरामं॥८॥मुग्धे
मधुमथनेमनुगतमनुसरराधिके॥हरेराम०हरेकृष्ण॥१॥ ॥२१॥

॥अष्टपदि॥२०॥श्रीगोविंदायनमः॥मंजुतरकेलिसदने॥प्रविश कुंजतल
राधेमाधवसमीपमिह बीलसरतीरभसहसीतवदने॥१॥नवभ
वदशोकदलशयनसारे॥प्रविशराधेमाधवसमीपमिहविलस
कुचकलशतरलहारे॥२॥कुसुमचयरचितशुचिवासगेहे॥प्रवि
शराधेमाधवसमीपमिहविलसकुसुमसुकुमारदेहे॥३॥चलम
लयदुपवनेसुरभिसीते॥प्रविशराधेमाधवसमीपमिहविल
सरतिवलीतललितगीते॥४॥विततबहुवल्लिनवपल्लवघने॥
प्रविशराधेमाधवसमीपमिहविलस चिरमलसपीनजघने॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१९

॥२२॥ ॥५॥मुग्धमुदितमधुपकुलकलितरावे॥प्रविश राधे माधवसमीप मिह विलसमदनरसरभसभावे॥६॥मधुरतरपिककृतकरनिनदमुखरे॥प्रविश राधे माधवसमीपमिह विलसदशनरुचिरुचिरशिखरे॥ ॥७॥विहितपद्मावतिसुखसमाजे॥कुरु मुरारे मंगलशतानि भणति जयदेवकवीराजे॥८॥अष्टपदि॥२१॥श्रीगोविंदायनमः॥

पराज राधावदनविलोकनवि कसितविविधविकारविभंगं॥जलनिधिमिव विधुमंडलदर्शनतरलित तुंगतरंगं॥१॥हरिमेकरसंचिरमभिलषितविलासं॥सा ददर्श गुरुहर्षवंशंवदवदनमनंगनिवासं॥ ॥२२॥

ध्रुपद॥हारममलतरतारमुरसि दधतं परिरभ्य विदूरं॥स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं॥२॥हरि०॥श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं॥नीलनलिनमिव पीतपरागपटलभरवलयितमूलं॥३॥हरी०॥तरलदृगंचलचलनमनोहरवदनजनितरतिरागं॥स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं॥४॥हरि०॥वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं॥स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं॥५॥हरि०॥शशिकिरणच्छुरितोदरजलधरसुंदरसकुसुमके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

23

॥२३॥ शं॥तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥६॥ह
रि०॥विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं॥मणिग
णकिरणसमूहसमुज्वलभूषणसुभगशरीरं॥७॥हरि०॥श्री
जयदेवभणितविभवद्विगुणीकृतभूषणभारं॥प्रणमतहृदिवि
नवमल निधायहरिं [illegible] रं सुकृतोदयसारं॥८॥हरिमेकरसंचीरमभिल
षितविलासं॥सादरशं गुरुहर्षवशंवदनमनंगनिवासं॥अष्टप
दि॥२२॥श्रीगोविंदायनमः॥कीसलयशयनतलेकुरुकामिनि
चरणनलिनविनिवेशं॥तवपदपल्लववैरिपराभवमिदमनुभ ॥२२॥

वतुसुवेशं॥१॥क्षणमधुनानारायणमनुगतमनुसरराधिके॥ध्रु
पद॥करकमलेनकरोमिचरणमहमागमितासिविदूरं॥क्षणमुप
कुरुशयनोपरिमामिवनुपुरमनुगतिशूरं॥२॥क्षणम०॥वदनसु
धानिधिगलितममृतमिवरचयवचनमनुकूलं॥वीरहमिवापन
यामिपयोधर [illegible] रोधकमुरसिदुकूलं॥३॥क्षणम०॥प्रियप
रिरंभणरभसवलितमिवपुलकैतमतिदुरवापं॥मदुरसिकुचक
लशंविनिवेशयशोषयमनसिजतापं॥४॥क्षणम०॥अधरसु
धारसमुपनयभामिनिजीवयमृतमिवदासं॥त्वइविनिहितमन

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ संविरहानलदग्धवपुषमविलासं॥५॥क्षणम॰॥शशिमुखीमु
खरयमणिरसनागुणमनुगुणकंठनिनादं॥श्रुतियुगलेपिकरव
विकलेममशमयचिरादवसादं॥६॥क्षणम॰॥माममतिविफल
रुषाविकलीकृतमवलोकितुमधुनेदं॥मीलतिलज्जीतमिवनवि४
यनंतरवीरमविसृजरतिखेदं॥७॥क्षणम॰॥श्रीजयदेवभ
णीतमिदमनुपदनिगदितमधुरिपुमोदं॥जनयतुरसिकज
नेषुमनोरमरतिरसभावविनोदं॥८॥क्षणमधुनानारायण
मनुगतमनुसरराधिके॥अष्टपदि॥२३॥हरेराम॰हरेकृष्ण॰॥२४॥

॥श्रीकेशवायनमः॥कुरुयदुनंदनचंदनशिशिरतरेणकरेणपयो
धरे॥मृगमदपत्रकमत्रमनोभवमंगलकलशसहोदरे॥१॥नि
जगादसायदुनंदने॥क्रीडतिहृदयानंदने॥ध्रुपदं॥अलिकुलगं
जनसंजनकंरतिनायकसायकमोचने॥त्वदधरचुंबनलंबितक
ज्जलमुज्वलयप्रियलोचने॥२॥निज॰॥नयनकुरंगतरंगविका
सनिरासकरेश्रुतिमंडले॥मनसिजपाशविलासधरेशुभवेश
निवेशयकुंडले॥३॥निज॰॥भ्रमर चयंरचयंतमुपरिरुचिरंसु
चिरंममसंमुखे॥नर्मजनकमलकंपरिकर्मयविमलेजितकमल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

25

अ९०॥

२५॥ मुखे॥४॥निज०॥मृगमदरसवलितंललितकुरु तिलकमलिकर जनीकरे॥विहितकलंककलंकमलाननविश्रमितश्रमसीकरे॥ ॥५॥निज०॥ममरुचिरे [illegible] चिकुरेकुरुमानदमानसजध्वजचाम रे॥रतिगलितेललितेकुसुमानिशिखंडिकडामरे॥६॥निजगा०॥ शिखंड४

जघने सरसघनेमममशंबरदारणवारणकंदरे॥मणिरशनावसनाभरण निशुभाशयवासयसुंदरे॥७॥निज०॥श्रीजयदेववचसिजयदेय सदयंहृदयंकुरुमंडने॥हरिचरणस्मरणामृतनिर्मितकलिकलु षज्वरखंडने॥८॥निजगादसायदुनंदने॥क्रीडतिहृदयानंदने॥ ॥२५॥

॥२४॥रचयकुचयोःपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघनेकांचि मंचस्रजंकबरिभरे॥कलयवलयश्रेणीपाणौपदेकुरुनुपुराविति नीगदितःप्रीतःपीतांबरोपितथाकरोत्॥१॥अष्टपदिःसमाप्तं॥श्री गोविंदार्पणमस्तु॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखीतंमया॥यदि शुद्धमशुद्धंवाममदोषोनविद्यते॥सके१७०२१रौद्रनामसंवत्सरे [illegible] आश्विनवद्यपंचमीभौमवासरेतेदिवसिराजारामभटदेवभटि नेपुस्तकलिखितंग्रंथसमाप्तं॥श्रीयेकनाथार्पणमस्तु॥रामकृष्ण

५ ५ ५ ५ ५ ५ ५ ५ ५ ५

(२८)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अष्टपदि समाप्तः॥

K K S U LIBRARY
RAMTEK
441 106
M-1277
Dist. Nagpur

27

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 11:42
,TRANSFERRED=2020/10/23 at 11:45:47
,PAGES=27
,TYPE=STD
,NAME=S0004459
,Book Name=M-1277-ASHTPADI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection